# AmnAyastotram

# આમ્નાયસ્તોત્રમ્

## Document Information

Text title : AmnAyastotram

File name : AmnAyastotram.itx

Category : devii, dashamahAvidyA, devI

Location : doc_devii

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : rudrayAmalataH shivavirachitaM

Latest update : October 5, 2015, May 11, 2020

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 13, 2021

*sanskritdocuments.org*

# આમ્નાયસ્તોત્રમ્

અથ રુદ્રયામલતઃ શિવવિરચિતં આમ્નાયસ્તોત્રમ્ ।

શ્રીનાથાદિગુરુત્રયં ગણપતિં પીઠત્રયં ભૈરવમ્ ।
સિદ્ધૌઘં વટુકત્રયં પદયુગં દૂતીક્રમં મણ્ડલમ્ ॥

વીરાન્દ્વ્યષ્ટચતુષ્કષષ્ટિનવકં વીરાવલીપઞ્ચકમ્ ।
શ્રીમન્માલિનિમન્ત્રરાજસહિતં વન્દે ગુરોર્મણ્ડલમ્ ॥

(ગુરુપાદુકામનુમુચ્ચાર્ય સુમુખાદિભિઃ
પઞ્ચમુદ્રાભિઃ શ્રીગુરું પ્રણમ્ય)

પૂર્વામ્નાયઃ -
શુદ્ધવિદ્યા ચ બાલા ચ દ્વાદશાર્ધા મતઙ્ગિની ।
દ્વિજત્વસાધિની વિદ્યા ગાયત્રી વેદમાતૃકા ॥ ૧॥

ગાણપત્યં કાર્તિકેયં મૃત્યુઞ્જયં નીલકણ્ઠમ્ ।
ત્ર્યમ્બકં જાતવેદાશ્ચ તથા પ્રત્યઙ્ગિરાદયઃ ॥ ૨॥

મુખાત્તત્પુરુષાજ્જાતા દ્વિકોટીમન્ત્રનાયિકાઃ ।
એતાઃ કામગિરીન્દ્રાશ્ચ પૂર્વામ્નાયસ્ય દેવતાઃ ॥ ૩॥

ગુરુત્રયાદિપીઠાન્તં ચતુર્વિંશત્સહસ્રકમ્ ।
એતદાવરણોપેતં પૂર્વામ્નાયં ભજામ્યહમ્ ॥ ૪॥

વિશુદ્ધૌ ચિન્તયેદ્ધીમાન્ પૂર્વામ્નાયસ્ય દેવતાઃ ।

દક્ષિણામ્નાયઃ -
સૌભાગ્યવિદ્યા બગળા વારાહી વટુકસ્તથા ॥ ૫॥

શ્રીતિરસ્કરિણી પ્રોક્તા મહામાયા પ્રકીર્તિતા ।
અઘોરં શરભં ખડ્ગરાવણં વીરભદ્રકમ્ ॥ ૬॥

રૌદ્રં શાસ્તા પાશુપતાદ્યસ્ત્રશસ્ત્રાદિભૈરવાઃ ।

દક્ષિણામૂર્તિમન્ત્રાદ્યાઃ શૈવાગમસમુદ્ભવાઃ ॥ ૭॥

અઘોરમુખસમ્ભૂતં મદંશં કોટિસઙ્ખ્યકમ્ ।
પૂર્વપીઠસ્થિતા દેવિ દક્ષિણામ્નાયદેવતાઃ ॥ ૮॥

દ્વિસહસ્રં તુ દેવ્યસ્તાઃ પરિવારસમન્વિતાઃ ।
ભૈરવાદિપદદ્વન્દ્વં ભજે દક્ષિણમુત્તમમ્ ॥ ૯॥

અનાહતે ચિન્તયેચ્ચ દક્ષિણામ્નાયદેવતાઃ ।

પશ્ચિમ્નાયાયઃ -
લોપામુદ્રા મહાદેવી અમ્બા ચ ભુવનેશ્વરી ॥ ૧૦॥

અન્નપૂર્ણા કામકલા સર્વસિદ્ધિપ્રદાયિની।
સુદર્શનં વૈનતેયં કાર્તવીર્યં નૃસિંહકમ્ ॥ ૧૧॥

નામત્રયં રામમન્ત્રં ગોપાલં સૌરમેવ ચ ।
ધન્વન્તરીન્દ્રજાલં ચ ઇન્દ્રાદિસુરમન્ત્રકમ્ ॥ ૧૨॥

દત્તાત્રેયં દ્વાદશાષ્ટૌ વૈષ્ણવાગમચોદિતાઃ ।
સદ્યોજાતમુખોદ્ભૂતા મન્ત્રાઃ સ્યુઃ કોટિસઙ્ખ્યકાઃ ॥ ૧૩॥

એતા જાલન્ધ્રપીઠસ્થાઃ પશ્ચિમામ્નાયદેવતાઃ ।
દૂત્યાદિ ચ ચતુષ્ષષ્ટિ સિદ્ધાન્તં ત્રિસહસ્રકમ્ ॥ ૧૪॥

આમ્નાય પશ્ચિમં વન્દે સર્વદા સર્વકામદમ્ ।
મણિપૂરે ચિન્તનીયાઃ પશ્ચિમામ્નાયદેવતાઃ ॥ ૧૫॥

ઉત્તરામ્નાયઃ -
તુરીયામ્બા મહાર્ઘા ચ અશ્વારૂઢા તથૈવ ચ ।
મિશ્રામ્બા ચ મહાલક્ષ્મીઃ શ્રીમદ્વાગ્વાદિની અપિ ॥ ૧૬॥

દુર્ગા કાળી તતશ્ચણ્ડી નકુલી ચ પુળિન્દિની ।
રેણુકા લક્ષ્મિવાગીશમાતૃકાદ્યાઃ સ્વયંવરા ॥ ૧૭॥

પઞ્ચામ્નાયસમોપેતં શ્રીવિદ્યાખ્યં મદંશકમ્ ।
વામદેવમુખોદ્ભૂતા દ્વિકોટિમન્ત્રનાયિકાઃ ॥ ૧૮॥

એતા ઓડ્યાણપીઠસ્થાઃ શાક્તાગમસમુદ્ભવાઃ ।
દ્વિસહસ્રં તુ દેવ્યસ્તાઃ પરિવારસમન્વિતાઃ ॥ ૧૯॥

મુદ્રાદિનવકં ચૈવ સિદ્ધાનાં મિથુનં તથા ।
વીરાવળીપઞ્ચકં ચ ભજેદામ્નાયમુત્તરમ્ ॥ ૨૦॥

સ્વાધિષ્ઠાને ચિન્તનીયા ઉત્તરામ્નાયદેવતાઃ ।

ઊર્ધ્વામ્નાયઃ -
પરાપરા ચ સા દેવી પરાશામ્ભવમેવ ચ ॥ ૨૧॥

પ્રાસાદં દહરં હંસં મહાવાક્યાદિકં પરમ્ ।
પઞ્ચાક્ષરં મહામન્ત્રં તારકં જન્મતારકમ્ ॥ ૨૨॥

ઈશાનમુખસમ્ભૂતં સ્વાત્માનન્દપ્રકાશકમ્ ।
કોટિસઙ્ખ્યા મહાદેવિ મદ્રૂપાઃ સર્વસિદ્ધિદાઃ ॥ ૨૩॥

એતાઃ શામ્ભવપીઠસ્થાઃ સહસ્રપરિવારિતાઃ ।
આરાધ્ય માલિનીપૂર્વં મણ્ડલાન્તં તથૈવ ચ ॥ ૨૪॥

સાયુજ્યહેતુકં નિત્યં વન્દે ચોર્ધ્વમકલ્મષમ્ ।
ઊર્ધ્વામ્નાયમનૂન્નિત્યં મૂલાધારે વિભાવયેત્ ॥ ૨૫॥

અનુત્તરામ્નાયઃ -
સ્મર્તવ્યા પાદુકા પૂર્વં ચરણં તદનન્તરમ્ ।
પઞ્ચામ્બા નવનાથાશ્ચ મૂલવિદ્યાસ્તતઃ પરમ્ ।
આધારવિદ્યાષટ્કં ચ પુનરઙ્ઘ્રિદ્વયં ક્રમાત્ ॥ ૨૬॥

શામ્ભવી ચાથ હૃલ્લેખા સમયા પરબોધિની ।
કૌલપઞ્ચાક્ષરી પઞ્ચદશાર્ણાઽનુત્તરાત્મિકા ॥ ૨૭॥

ષોડશી પૂર્તિવિદ્યા ચ મહાત્રિપુરસુન્દરી ।
ઊર્ધ્વશ્રીપાદુકાપૂર્વં ચરણાન્તં ગુરુક્રમાત્ ॥ ૨૮॥

પશ્ચાદનુતરં વન્દે પરબ્રહ્મસ્વરૂપિણીમ્ ।
અનુત્તરામ્નાયમનૂનાજ્ઞાનાચક્રે વિભાવયેત્ ॥ ૨૯॥

શ્રીનાથગુરુમન્ત્રાદીન્ મણ્ડલાન્તં યથાક્રમમ્ ।
સપ્તકોટિમહામન્ત્રં દ્વાદશાન્તે સદા સ્મરેત્ ॥ ૩૦॥

શુચિર્વાપ્યશુચિર્વાપિ ગચ્છંસ્તિષ્ઠન્ સ્વપન્નપિ ।
મન્ત્રૈકશરણો વિદ્વાન્ મનસાપિ સદા સ્મરન્ ॥ ૩૧॥

તત્તત્સિદ્ધિં ચ સાહસ્રં જપેત્સાધકપુઙ્ગવઃ ।

જપાન્તે શુદ્ધમાલા ચ આમ્નાયસ્તોત્રમુત્તમમ્ ॥ ૩૨॥

લલિતાનામસાહસ્રં સર્વપૂર્તિકરં સ્તવમ્ ।
સ્તવરાજં ચ પઞ્ચૈતે ભક્તઃ પ્રતિદિનં પઠેત્ ॥ ૩૩॥

ભુક્ત્વા ભોગાન્ યથાકામં સર્વભૂતહિતે રતઃ ।
સભાર્યાપુત્રસૌભાગ્યઃ સભૂતિઃ પશુમાન્ ભવેત્ ॥ ૩૪॥

એકવારં જપેદેતત્ કોટિયજ્ઞફલં લભેત્ ।
એતદ્વિજ્ઞાનમાત્રેણ સર્વેષાં દેશિકોત્તમઃ ॥

શિવસાયુજ્યમાપ્નોતિ શિવયોરેવશાસનાત્ ॥ ૩૫॥

॥ ઇતિ રુદ્રયામલતન્ત્રે ઉમમાહેશ્વરસંવાદે
શિવેનરચિતમામ્નાયસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded and proofread by Sunder Hattangadi

---

*AmnAyastotram*

pdf was typeset on June 13, 2021

Please send corrections to *sanskrit@cheerful.com*